# Nitishatak by Bhartrihari

# નીતિશતકં ભર્તૃહરિકૃત

## Document Information

Text title : bhartRiharikRita nItishatakam

File name : niiti.itx

Category : shataka, major_works, bhartrihari

Location : doc_z_misc_major_works

Transliterated by : Atul Narkhade

Proofread by : Atul Narkhade, Kaushal Kaloo

Description-comments : Available at archive.org

Latest update : September 19, 2022

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

Nitishatak by Bhartrihari

# નીતિશતકં ભર્તૃહરિકૃત

દિક્કાલાદ્યનવચ્છિન્નાનન્તચિન્માત્રમૂર્તયે ।
સ્વાનુભૂત્યેકનામાય નમઃ શાન્તાય તેજસે ॥ ૧॥

યાં ચિન્તયામિ સતતં મયિ સા વિરક્તા
સાપ્યન્યમિચ્છતિ જનં સ જનોઽન્યસક્તઃ ।
અસ્મત્કૃતે ચ પરિશુષ્યતિ કાચિદન્યા
ધિક્ તાં ચ તં ચ મદનં ચ ઇમાં ચ માં ચ ॥ ૨॥

અજ્ઞઃ સુખમારાધ્યઃ સુખતરમારાધ્યતે વિશેષજ્ઞઃ ।
જ્ઞાનલવદુર્વિગ્ધં બ્રહ્માપિ નરં ન રઞ્જયતિ ॥ ૩॥

પ્રસહ્ય મણિમુદ્ધરેન્મકરવક્ત્રદંષ્ટ્રાઙ્કુરા-
ત્સમુદ્રમપિ સંતરેત્પ્રચલદુર્મિમાલાકુલમ્ ॥

ભુજઙ્ગમપિ કોપિતં શિરસિ પુષ્પવદ્ધારયે-
ન્ન તુ પ્રતિનિવિષ્ટમૂર્ખજનચિત્તમારાધયેત્ ॥ ૪॥

લભેત સિકતાસુ તૈલમપિ યત્નતઃ પીડયન્
પિબેચ્ચ મૃગતૃષ્ણિકાસુ સલિલં પિપાસાર્દિતઃ ।
કદાચિદપિ પર્યટન્શશવિષાણમાસાદયેન્
ન તુ પ્રતિનિવિષ્ટમૂર્ખજનચિત્તમારાધયેત્ ॥ ૫॥

વ્યાલં બાલમૃણાલતન્તુભિરસૌ રોદ્ધું સમુજ્જૃમ્ભતે
છેત્તું વજ્રમણીં શિરીષકુસુમપ્રાન્તેન સન્નહ્યતિ ।
માધુર્યં મધુબિન્દુના રચયિતું ક્ષારામ્બુધેરીહતે
નેતું વાઞ્છતિ યઃ ખલાન્પથિ સતાં સૂક્તૈઃ સુધાસ્યન્દિભિઃ ॥ ૬॥

સ્વાયત્તમેકાન્તગુણં વિધાત્રા
વિનિર્મિતં છાદનમજ્ઞતાયાઃ ।
વિશેષતઃ સર્વવિદાં સમાજે

વિભૂષણં મૌનમપણ્ડિતાનામ્ ॥ ૭॥

યદા કિઞ્ચિજ્જ્ઞોઽહં ગજ ઇવ મદાન્ધઃ સમભવમ્
તદા સર્વજ્ઞોઽસ્મીત્યભવદવલિપ્તં મમ મનઃ ।
યદા કિઞ્ચિત્કિઞ્ચિદ્બુધજનસકાશાદવગતમ્
તદા મૂર્ખોઽસ્મીતિ જ્વર ઇવ મદો મે વ્યપગતઃ ॥ ૮॥

કૃમિકુલચિતં લાલાક્લિન્નં વિગન્ધિ જુગુપ્સિતં
નિરુપમરસં પ્રીત્યા ખાદન્નરાસ્થિ નિરામિષમ્ ।
સુરપિતમપિ શ્વા પાર્શ્વસ્થં વિલોક્ય ન શઙ્કતે
ન હિ ગણયતિ ક્ષુદ્રો જન્તુઃ પરિગ્રહફલ્ગુતામ્ ॥ ૯॥

શિરઃ શાર્વં સ્વર્ગાત્પશુપતિશિરસ્તઃ ક્ષિતિધરં
મહીધ્રાદુત્તુઙ્ગાદવનિમવનેશ્ચાપિ જલધિમ્ ।
અધોઽધો ગઙ્ગેયં પદમુપગતા સ્તોકમથવા
વિવેકભ્રષ્ટાનાં ભવતિ વિનિપાતઃ શતમુખઃ ॥ ૧૦॥

શક્યો વારયિતું જલેન હુતભુક્છત્રેણ સૂર્યાતપો
નાગેન્દ્રો નિશિતાઙ્કુશેન સમદો દણ્ડેન ગોગર્દભૌ ।
વ્યાધિર્ભેષજસઙ્ગ્રહૈશ્ચ વિવિધૈર્મન્ત્રપ્રયોગૈર્વિષં
સર્વસ્યૌષધમસ્તિ શાસ્ત્રવિહિતં મૂર્ખસ્ય નાસ્ત્યૌષધમ્ ॥ ૧૧॥

સાહિત્યસઙ્ગીતકલાવિહીનઃ સાક્ષાત્પશુઃ પુચ્છવિષાણહીનઃ ।
તૃણં ન ખાદન્નપિ જીવમાનઃ તદ્ભાગધેયં પરમં પશૂનામ્ ॥ ૧૨॥

યેષાં ન વિદ્યા ન તપો ન દાનં
જ્ઞાનં ન શીલં ન ગુણો ન ધર્મઃ ।
તે મર્ત્યલોકે ભુવિ ભારભૂતાઃ
મનુષ્યરૂપેણ મૃગાશ્ચરન્તિ ॥ ૧૩॥

વરં પર્વતદુર્ગેષુ ભ્રાન્તં વનચરૈઃ સહ ।
ન મૂર્ખજનસમ્પર્કઃ સુરેન્દ્રભવનેષ્વપિ ॥ ૧૪॥

શાસ્ત્રોપસ્કૃતશબ્દસુન્દરગિરઃ શિષ્યપ્રદેયાગમા
વિખ્યાતાઃ કવયો વસન્તિ વિષયે યસ્ય પ્રભોર્નિર્ધનાઃ ।
તજ્જાડ્યં વસુધાધિપસ્ય કવયસ્ત્વર્થં વિનાપીશ્વરાઃ
કુત્સ્યાઃ સ્યુઃ કુપરીક્ષકા ન મણયો યૈરર્ઘતઃ પાતિતાઃ ॥ ૧૫॥

હર્તુર્યાતિ ન ગોચરં કિમપિ શં પુષ્ણાતિ યત્ સર્વદા-
ઽપ્યર્થિભ્યઃ પ્રતિપાદ્યમાનમનિષં પ્રાપ્નોતિ વૃદ્ધિં પરામ્ ।
કલ્પાન્તેષ્વપિ ન પ્રયાતિ નિધનં વિદ્યાખ્યમન્તર્ધનં
યેષાં તાન્ પ્રતિ માનમુજ્ઝત નૃપાઃ કસ્તૈઃ સહ સ્પર્ધતે ॥ ૧૬॥

અધિગતપરમાર્થાન્ પણ્ડિતાન્ માવમંસ્તા-
સ્તૃણમિવ લઘુ લક્ષ્મીર્નૈવ તાન્ સંરુણદ્ધિ ।
અભિનવમદલેખાશ્યામગણ્ડસ્થલાનાં
ન ભવતિ વિષતન્તુર્વારણં વારણાનામ્ ॥ ૧૭॥

અમ્ભોજિનીવનવિહારવિલાસમેવ
હંસસ્ય હન્તિ નિતરાં કુપિતો વિધાતા ।
ન ત્વસ્ય દુગ્ધજલભેદવિધૌ પ્રસિદ્ધાં
વૈદગ્ધ્યકીર્તિમપહર્તુમસૌ સમર્થઃ ॥ ૧૮॥

કેયૂરાણિ ન ભૂષયન્તિ પુરુષં હારા ન ચન્દ્રોજ્જ્વલા
ન સ્નાનં ન વિલેપનં ન કુસુમં નાલઙ્કૃતા મૂર્ધજાઃ ।
વાણ્યેકા સમલઙ્કરોતિ પુરુષં યા સંસ્કૃતા ધાર્યતે
ક્ષીયન્તે ખલુ ભૂષણાનિ સતતં વાગ્ભૂષણં ભૂષણમ્ ॥ ૧૯॥

વિદ્યા નામ નરસ્ય રૂપમધિકં પ્રચ્છન્નગુપ્તં ધનં
વિદ્યા ભોગકરી યશસ્સુખકરી વિદ્યા ગુરૂણાં ગુરુઃ ।
વિદ્યા બન્ધુજનો વિદેશગમને વિદ્યા પરા દેવતા
વિદ્યા રાજસુ પૂજિતા ન તુ ધનં વિદ્યાવિહીનઃ પશુઃ ॥ ૨૦॥

ક્ષાન્તિશ્ચેત્ કવચેન કિં કિમરિભિઃ ક્રોધોઽસ્તિ ચેદ્દેહિનાં
જ્ઞાતિશ્ચેદનલેન કિં યદિ સુહૃદ્ દિવ્યૌષધૈઃ કિં ફલમ્ ।
કિં સર્પૈર્યદિ દુર્જનાઃ કિમુ ધનૈર્વિદ્યા ન વન્દ્યા યદિ
વ્રીડા ચેત્કિમુ ભૂષણૈઃ સુકવિતા યદ્યસ્તિ રાજ્યેન કિમ્ ॥ ૨૧॥

દાક્ષિણ્યં સ્વજને દયા પરજને શાઠ્યં સદા દુર્જને
પ્રીતિઃ સાધુજને નયો નૃપજને વિદ્વજ્જને ચાર્જવમ્ ।
શૌર્યં શત્રુજને ક્ષમા ગુરુજને કાન્તાજને ધૃષ્ટતા
યે ચૈવં પુરુષાઃ કલાસુ કુશલાસ્તેષ્વેવ લોકસ્થિતિઃ ॥ ૨૨॥

જાડ્યં ધિયો હરતિ સિઞ્ચતિ વાચિ સત્યં
માનોન્નતિં દિશતિ પાપમપાકરોતિ ।

ચેતઃ પ્રસાદયતિ દિક્ષુ તનોતિ કીર્તિં
 સત્સઙ્ગતિઃ કથય કિં ન કરોતિ પુંસામ્ ॥ ૨૩॥

જયન્તિ તે સુકૃતિનઃ રસસિદ્ધાઃ કવીશ્વરાઃ ।
નાસ્તિ યેષાં યશઃકાયે જરામરણજં ભયમ્ ॥ ૨૪॥

સૂનુઃ સચ્ચરિતઃ સતી પ્રિયતમા સ્વામી પ્રસાદોન્મુખઃ
 સ્નિગ્ધં મિત્રમવઞ્ચકઃ પરિજનો નિષ્ક્લેશલેશં મનઃ ।
આકારો રુચિરઃ સ્થિરશ્ચ વિભવો વિદ્યાવદાતં મુખં
 તુષ્ટે વિષ્ટપકષ્ટહારિણિ હરૌ સમ્પ્રાપ્યતે દેહિના ॥ ૨૫॥

પ્રાણાઘાતાન્નિવૃત્તિઃ પરધનહરણે સંયમઃ સત્યવાક્યં
 કાલે શક્ત્યા પ્રદાનં યુવતિજનકથામૂકભાવઃ પરેષામ્ ।
તૃષ્ણાસ્રોતોવિભઙ્ગો ગુરુષુ ચ વિનયઃ સર્વભૂતાનુકમ્પા
 સામાન્યઃ સર્વશાસ્ત્રેષ્વનુપહતવિધિઃ શ્રેયસામેષ પન્થાઃ ॥ ૨૬॥

પ્રારભ્યતે ન ખલુ વિઘ્નભયેન નીચૈઃ
 પ્રારભ્ય વિઘ્નવિહતા વિરમન્તિ મધ્યાઃ ॥

વિઘ્નૈઃ પુનઃ પુનરપિ પ્રતિહન્યમાનાઃ
 પ્રારબ્ધમુત્તમગુણા ન પરિત્યજન્તિ ॥ ૨૭॥

અસન્તો નાભ્યર્થ્યાઃ સુહૃદપિ ન યાચ્યઃ કૃશધનઃ
 પ્રિયા ન્યાય્યા વૃત્તિર્મલિનમસુભઙ્ગેઽપ્યસુકરમ્ ।
વિપદ્યુચ્ચૈઃ સ્થેયં પદમનુવિધેયં ચ મહતાં
 સતાં કેનોદ્દિષ્ટં વિષમમસિધારાવ્રતમિદમ્ ॥ ૨૮॥

ક્ષુત્ક્ષામોઽપિ જરાકૃશોઽપિ શિથિલપ્રાયોઽપિ કષ્ટાં દશામ્
 આપન્નોઽપિ વિપન્નદીધિતિરપિ પ્રાણેષુ ગચ્છત્સ્વપિ ।
મત્તેભેન્દ્રવિભિન્નકુમ્ભકવલગ્રાસૈકબદ્ધસ્પૃહઃ
 કિં જીર્ણં તૃણમત્તિ માનમહતામગ્રેસરઃ કેસરિઃ ॥ ૨૯॥

સ્વલ્પસ્નાયુવસાવશેષમલિનં નિર્માંસમપ્યસ્થિકં
 શ્વા લબ્ધ્વા પરિતોષમેતિ ન તુ તત્તસ્ય ક્ષુધાશાન્તયે ।
સિંહો જમ્બુકમઙ્કમાગતમપિ ત્યક્ત્વા નિહન્તિ દ્વિપં
 સર્વઃ કૃચ્છ્રગતોઽપિ વાઞ્છતિ જનઃ સત્વાનુરુપં ફલમ્ ॥ ૩૦॥

લાઙ્ગુલચાલનમધશ્ચરણાવપાતં

ભૂમૌ નિપત્ય વદનોદરદર્શનં ચ ।
શ્વા પિણ્ડદસ્ય કુરુતે ગજપુઙ્ગવસ્તુ
ધીરં વિલોકયતિ ચાટુશતૈશ્ચ ભુઙ્ક્તે ॥ ૩૧॥

પરિવર્તિનિ સંસારે મૃતઃ કો વા ન જાયતે ॥

સ જાતો યેન જાતેન યાતિ વંશઃ સમુન્નતિમ્ ॥ ૩૨॥

કુસુમસ્તબકસ્યેવ દ્વયી વૃત્તિર્મનસ્વિનઃ ।
મૂર્ધ્નિ વા સર્વલોકસ્ય વિશીર્યેત વનેઽથવા ॥ ૩૩॥

સન્ત્યન્યેઽપિ બૃહસ્પતિપ્રભૃતયઃ સમ્ભાવિતાઃ પઞ્ચષાઃ
તાન્ પ્રત્યેષ વિશેષવિક્રમરુચી રાહુર્ન વૈરાયતે ।
દ્વાવેવ ગ્રસતે દિવાકરનિશાપ્રાણેશ્વરૌ ભાસ્વરૌ
ભ્રાતઃ પર્વણિ પશ્ય દાનવપતિઃ શીર્ષાવશેષાકૃતિઃ ॥ ૩૪॥

વહતિ ભુવનશ્રેણિં શેષઃ ફણાફલસ્થિતાં
કમઠપતિના મધ્યે પૃષ્ઠં સદા ચ ધાર્યતે ।
તમપિ કુરુતે ક્રોધાધીનં પયોધિરનાદરા-
દહહ મહતાં નિઃસીમાનશ્ચરિત્રવિભૂતયઃ ॥ ૩૫॥

વરં પક્ષચ્છેદઃ સમદમઘવન્મુક્તકુલિશ-
પ્રહારૈરુદ્ગચ્છદ્બહુલદહનોદ્ગારગુરુભિઃ ।
તુષારાદ્રેઃ સૂનોરહહ પિતરિ ક્લેશવિવશે
ન ચાસૌ સમ્પાતઃ પયસિ પયસાં પત્યુરુચિતઃ ॥ ૩૬॥

યદચેતનોઽપિ પાદૈઃ સ્પૃષ્ટઃ પ્રજ્વલતિ સવિતુરિનકાન્તઃ ।
તત્તેજસ્વી પુરુષઃ પરકૃતનિકૃતિં કથં સહતે ॥ ૩૭॥

સિંહઃશિશુરપિ નિપતતિ મદમલિનકપોલભિત્તિષુ ગજેષુ ।
પ્રકૃતિરિયં સત્વવતાં ન ખલુ વયસસ્તેજસો હેતુઃ ॥ ૩૮॥

જાતિર્યાતુ રસાતલં ગુણગણૈસ્તત્રાપ્યધો ગમ્યતાં
શીલં શૈલતટાત્પતત્વભિજનઃ સન્દહ્યતાં વહ્નિના ।
શૌર્યે વૈરિણિ વજ્રમાશુ નિપતત્વર્થોઽસ્તુ નઃ કેવલં
યેનૈકેન વિના ગુણાસ્તૃણલવપ્રાયાઃ સમસ્તા ઇમે ॥ ૩૯॥

તાનીન્દ્રિયાણ્યવિકલાનિ તદેવ નામ
સા બુદ્ધિરપ્રતિહતા વચનં તદેવ ।

અર્થોષ્મણા વિરહિતઃ પુરુષઃ ક્ષણેન
    સોઽપ્યન્ય એવ ભવતીતિ વિચિત્રમેતત્ ॥ ૪૦॥

યસ્યાસ્તિ વિત્તં સ નરઃ કુલીનઃ
    સ પણ્ડિતઃ સ શ્રુતવાન્ ગુણજ્ઞઃ ।
સ એવ વક્તા સ ચ દર્શનીયઃ
    સર્વે ગુણાઃ કાઞ્ચનમાશ્રયન્તિ ॥ ૪૧॥

દૌર્મન્ત્ર્યાન્નૃપતિર્વિનશ્યતિ યતિઃ સઙ્ગાત્ સુતો લાલનાદ્
    વિપ્રોઽનધ્યનાત્ કુલં કુતનયાચ્છીલં ખલોપાસનાત્ ।
હ્રીર્મદ્યાદનવેક્ષણાદપિ કૃષિઃ સ્નેહઃ પ્રવાસાશ્ર-
    યાન્મૈત્રી ચાપ્રણયાત્ સમૃદ્ધિરનયાત્ ત્યાગઃ પ્રમાદાદ્ધનમ્ ॥ ૪૨॥

દાનં ભોગો નાશસ્તિસ્રો ગતયો ભવન્તિ વિત્તસ્ય ।
યો ન દદાતિ ન ભુઙ્ક્તે તસ્ય તૃતીયા ગતિર્ભવતિ ॥ ૪૩॥

મણિઃ શાણોલ્લીઢઃ સમરવિજયી હેતિદલિતો
    મદક્ષીબો નાગઃ શરદિ સરિતઃ શ્યાનપુલિનાઃ ।
કલાશેષશ્ચન્દ્રઃ સુરતમૃદિતા બાલવનિતા
    તનિમ્ના શોભન્તે ગલિતવિભવાશ્ચાર્થિષુ નરાઃ ॥ ૪૪॥

પરિક્ષીણઃ કશ્ચિત્સ્પૃહયતિ યવાનાં પ્રસૃતયે
    સ પશ્ચાત્ સમ્પૂર્ણઃ કલયતિ ધરિત્રીં તૃણસમામ્ ।
અતશ્ચાનૈકાન્ત્યાદ્ગુરુલઘુતયાઽર્થેષુ ધનિના-
    મવસ્થા વસ્તૂનિ પ્રથયતિ ચ સઙ્કોચયતિ ચ ॥ ૪૫॥

રાજન્ દુધુક્ષસિ યદિ ક્ષિતિધેનુમેતાં
    તેનાદ્ય વત્સમિવ લોકમમું પુષાણ ।
તસ્મિંશ્ચ સમ્યગનિશં પરિપોષ્યમાણે
    નાનાફલૈઃ ફલતિ કલ્પલતેવ ભૂમિઃ ॥ ૪૬॥

સત્યાનૃતા ચ પરુષા પ્રિયવાદિની ચ
    હિંસ્રા દયાલુરપિ ચાર્થપરા વદાન્યા ।
નિત્યવ્યયા પ્રચુરનિત્યધનાગમા ચ
    વારાઙ્ગનેવ નૃપનીતિરનેકરુપા ॥ ૪૭॥

આજ્ઞા કીર્તિઃ પાલનં બ્રાહ્મણાનાં

દાનં ભોગઃ મિત્રસંરક્ષણં ચ ।
યેષામેતે ષડ્ગુણા ન પ્રવૃતાઃ
કોઽર્થસ્તેષાં પાર્થિવોપાશ્રયેણ ॥ ૪૮॥

યદ્ધાત્રા નિજભાલપટ્ટલિખિતં સ્તોકં મહદ્વા ધનં
તત્ પ્રાપ્નોતિ મરુસ્થલેઽપિ નિતરાં મેરૌ તતો નાધિકમ્ ।
તદ્ધીરો ભવ વિત્તવત્સુ કૃપણાં વૃત્તિં વૃથા મા કૃથાઃ
કૂપે પશ્ય પયોનિધાવપિ ઘટો ગૃહ્ણાતિ તુલ્યં જલમ્ ॥ ૪૯॥

ત્વમેવ ચાતકાધાર ઇતિ કેષાં ન ગોચરઃ ।
કિમમ્ભોદ વદાસ્માકં કાર્પણ્યોક્તિં પ્રતીક્ષસે ॥ ૫૦॥

રે રે ચાતક સાવધાનમનસા મિત્ર ક્ષણં શ્રૂયતામ્
અમ્ભોદા બહવો વસન્તિ ગગને સર્વેઽપિ નૈકાદૃશાઃ ।
કેચિદ્વૃષ્ટિભિરાર્દ્રયન્તિ ધરણીં ગર્જન્તિ કેચિદ્વૃથા
યં યં પશ્યસિ તસ્ય તસ્ય પુરતો મા બ્રૂહિ દીનં વચઃ ॥ ૫૧॥

અકરુણત્વમકારણવિગ્રહઃ પરધને પરયોષિતિ ચ સ્પૃહા ।
સુજનબન્ધુજનેષ્વસહિષ્ણુતા પ્રકૃતિસિદ્ધમિદં હિ દુરાત્મનામ્ ॥ ૫૨॥

દુર્જનઃ પરિહર્તવ્યો વિદ્યયાલઙ્કૃતોઽપિ સન્ ।
મણિના ભૂષિતઃ સર્પઃ કિમસૌ ન ભયઙ્કરઃ ॥ ૫૩॥

જાડ્યં હ્રીમતિ ગણ્યતે વ્રતરુચૌ દમ્ભઃ શુચૌ કૈતવં
શૂરે નિર્ઘૃણતા મુનૌ વિમતિતા દૈન્યં પ્રિયાલાપિનિ । (નિર્ઘ્ર્‌ઽઇણતા ઋજો)
તેજસ્વિન્યવલિપ્તતા મુખરતા વક્તર્યશક્તિઃ સ્થિરે
તત્કો નામ ગુણો ભવેત્સ ગુણિનાં યો દુર્જનૈર્નાઙ્કિતઃ ॥૫૪॥ (ભવેત્સુગુણિનાં)

લોભશ્ચેદગુણેન કિં પિશુનતા યદ્યસ્તિ કિં પાતકૈઃ
સત્યં ચેત્તપસા ચ કિં શુચિ મનો યદ્યસ્તિ તીર્થેન કિમ્ ।
સૌજન્યં યદિ કિં ગુણૈઃ સુમહિમા યદ્યસ્તિ કિં મણ્ડનૈઃ
સદ્વિદ્યા યદિ કિં ધનૈરપયશો યદ્યસ્તિ કિં મૃત્યુના ॥ ૫૫॥

શશી દિવસધૂસરો ગલિતયૌવના કામિની
સરો વિગતવારિજં મુખમનક્ષરં સ્વાકૃતેઃ ।
પ્રભુર્ધનપરાયણઃ સતતદુર્ગતઃ સજ્જનો
નૃપાઙ્ગણગતઃ ખલો મનસિ સપ્ત શલ્યાનિ મે ॥ ૫૬॥

ન કશ્ચિચ્ચણ્ડકોપાનામાત્મીયો નામ ભૂભુજામ્ ।
હોતારમપિ જુહ્વાનં સ્પૃષ્ટો દહતિ પાવકઃ ॥ ૫૭॥

મૌનાન્મૂકઃ પ્રવચનપટુર્વાતુલો જલ્પકો વા
    ધૃષ્ટઃ પાર્શ્વે વસતિ ચ સદા દૂરતશ્ચાપ્રગલ્ભઃ ।
ક્ષાન્ત્યા ભીરુર્યદિ ન સહતે પ્રાયશો નાભિજાતઃ
    સેવાધર્મઃ પરમગહનો યોગિનામપ્યગમ્યઃ ॥ ૫૮॥

ઉદ્ભાસિતાખિલખલસ્ય વિશ્રુઙ્ખલસ્ય
    પ્રાગ્જાતવિસ્તૃતનિજાધમકર્મવૃત્તેઃ ।
દૈવાદવાપ્તવિભવસ્ય ગુણદ્વિષોઽસ્ય
    નીચસ્ય ગોચરગતૈઃ સુખમાપ્યતે કૈઃ ॥ ૫૯॥

આરમ્ભગુર્વી ક્ષયિણી ક્રમેણ
    લઘ્વી પુરા વૃદ્ધિમતી ચ પશ્ચાત્ ।
દિનસ્ય પૂર્વાર્ધપરાર્ધભિન્ના
    છાયેવ મૈત્રી ખલસજ્જનાનામ્ ॥ ૬૦॥

મૃગમીનસજ્જનાનાં તૃણજલસન્તોષવિહિતવૃત્તિનામ્ ।
લુબ્ધકધીવરપિશુના નિષ્કારણવૈરિણો જગતિ ॥ ૬૧॥

વાઞ્છા સજ્જનસઙ્ગમે પરગુણે પ્રીતિર્ગુરૌ નમ્રતા
    વિદ્યાયાં વ્યસનં સ્વયોષિતિ રતિર્લોકાપવાદાદ્ભયમ્ ।
ભક્તિઃ શૂલિનિ શક્તિરાત્મદમને સંસર્ગમુક્તિઃ ખલે
    યેષ્વેતે નિવસન્તિ નિર્મલગુણાસ્તેભ્યો નરેભ્યો નમઃ ॥ ૬૨॥

વિપદિ ધૈર્યમથાભ્યુદયે ક્ષમા સદસિ વાક્પટુતા યુધિ વિક્રમઃ ।
યશસિ ચાભિરુચિર્વ્યસનં શ્રુતૌ પ્રકૃતિસિદ્ધમિદં હિ મહાત્મનામ્ ॥ ૬૩॥

પ્રદાનં પ્રચ્છન્નં ગૃહમુપગતે સમ્ભ્રમવિધિઃ
    પ્રિયં કૃત્વા મૌનં સદસિ કથનં ચાપ્યુપકૃતે ।
અનુત્સેકો લક્ષ્મ્યામનભિભવગન્ધાઃ પરકથાઃ
    સતાં કેનોદ્દિષ્ટં વિષમમસિધારાવ્રતમિદમ્ ॥ ૬૪॥

કરે શ્લાઘ્યસ્ત્યાગઃ શિરસિ ગુરુપાદપ્રણયિતા
    મુખે સત્યા વાણી વિજયિભુજયોર્વીર્યમતુલમ્ ।
હૃદિ સ્વચ્છા વૃત્તિઃ શ્રુતમધિગતં ચ શ્રવણયો-

વિનાપ્યૈશ્વર્યેણ પ્રકૃતિમહતાં મણ્ડનમિદમ્ ॥ ૬૫॥

સમ્પત્સુ મહતાં ચિત્તં ભવત્યુત્પલકોમલમ્ ।
આપત્સુ ચ મહાશૈલશિલાસઙ્ઘાતકર્કશમ્ ॥ ૬૬॥

સન્તપ્તાયસિ સંસ્થિતસ્ય પયસો નામાપિ ન જ્ઞાયતે
મુક્તાકારતયા તદેવ નલિનીપત્રસ્થિતં રાજતે ।
સ્વાત્યાં સાગરશુક્તિમધ્યપતિતં તન્મૌક્તિકં જાયતે
પ્રાયેણાધમમધ્યમોત્તમગુણઃ સંસર્ગતો જાયતે ॥ ૬૭॥

પ્રીણાતિ યઃ સુચરિતઃ પિતરં સ પુત્રો
યદ્ભર્તુરેવ હિતમિચ્છતિ તત્ કલત્રમ્ ।
તન્મિત્રમાપદિ સુખે ચ સમક્રિયં યદ્
એતત્ ત્રયં જગતિ પુણ્યકૃતો લભન્તે ॥ ૬૮॥

એકો દેવઃ કેશવો વા શિવો વા
હ્યેકં મિત્રં ભૂપતિર્વા યતિર્વા ।
એકો વાસઃ પત્તને વા વને વા
હ્યેકા ભાર્યા સુન્દરી વા દરી વા ॥ ૬૯॥

નમ્રત્વેનોન્નમન્તઃ પરગુણકથનૈઃ સ્વાન્ ગુણાન્ ખ્યાપયન્તઃ
સ્વાર્થાન્ સમ્પાદયન્તો વિતતપૃથુતરારમ્ભયત્નાઃ પરાર્થે ।
ક્ષાન્ત્યૈવાક્ષેપરુક્ષાક્ષરમુખરમુખાન્ દુર્જનાન્ દૂષયન્તઃ
સન્તઃ સાશ્ચર્યચર્યા જગતિ બહુમતાઃ કસ્ય નાભ્યર્ચનીયાઃ ॥ ૭૦॥

ભવન્તિ નમ્રાસ્તરવઃ ફલોદ્ગમૈ-
ર્નવામ્બુભિર્દૂરવિલમ્બિનો ઘનાઃ ।
અનુદ્ધતાઃ સત્પુરુષાઃ સમૃદ્ધિભિઃ
સ્વભાવ એવૈષ પરોપકારિણામ્ ॥ ૭૧॥

શ્રોત્રં શ્રુતેનૈવ ન કુણ્ડલેન
દાનેન પાણિર્ન તુ કઙ્કણેન ।
વિભાતિ કાયઃ કરુણાપરાણાં (વિભાતિ કાયઃ ખલુ સજ્જનાનાં)
પરોપકારૈર્ન તુ ચન્દનેન ॥ ૭૨॥

પાપાન્નિવારયતિ યોજયતે હિતાય
ગુહ્યં નિગૂહતિ ગુણાન્ પ્રકટીકરોતિ ।

આપદ્ગતં ચ ન જહાતિ દદાતિ કાલે
    સન્મિત્રલક્ષણમિદં નિગદન્તિ સન્તઃ ॥ ૭૩॥

પદ્માકરં દિનકરો વિકચીકરોતિ
    ચન્દ્રો વિકાસયતિ કૈરવચક્રવાલમ્ ।
નાભ્યર્થિતો જલધરોઽપિ જલં દદાતિ
    સન્તઃ સ્વયં પરહિતે વિહિતાભિયોગાઃ ॥ ૭૪॥

એતે સત્પુરુષાઃ પરાર્થઘટકાઃ સ્વાર્થં પરિત્યજ્ય યે
    સામાન્યાસ્તુ પરાર્થમુદ્યમભૃતઃ સ્વાર્થાવિરોધેન યે ।
તેઽમી માનવરાક્ષસાઃ પરહિતં સ્વાર્થાય વિઘ્નન્તિ યે
    યે વિઘ્નન્તિ નિરર્થકં પરહિતં તે કે ન જાનીમહે ॥ ૭૫॥

ક્ષીરેણાત્મગતોદકાય હિ ગુણા દત્તાઃ પુરા તેઽખિલાઃ
    ક્ષીરોત્તાપમવેક્ષ્ય તેન પયસા સ્વાત્મા કૃશાણૌ હુતઃ ।
ગન્તું પાવકમુન્મનસ્તદભવદ્ દૃષ્ટ્વા તુ મિત્રાપદં
    યુક્તં તેન જલેન શામ્યતિ સતાં મૈત્રી પુનસ્ત્વીદૃશી ॥ ૭૬॥

ઇતઃ સ્વપિતિ કેશવઃ કુલમિતસ્તદીયદ્વીષા-
    મિતશ્ચ શરણાર્થિનાં શિખરિણાં ગણાઃ શેરતે ।
ઇતોઽપિ વડવાનલઃ સહ સમસ્તસંવર્તકૈ-
    રહો વિતતમૂર્જિતં ભારસહં ચ સિન્ધોર્વપુઃ ॥ ૭૭॥

તૃષ્ણાં છિન્ધિ ભજ ક્ષમાં જહિ મદં પાપે રતિં મા કૃથાઃ
    સત્યં બ્રૂહ્યનુયાહિ સાધુપદવીં સેવસ્વ વિદ્વજ્જનમ્ ।
માન્યાન્ માનય વિદ્વિષોઽપ્યનુનય પ્રખ્યાપય પ્રશ્રયં
    કીર્તિં પાલય દુઃખિતે કુરુ દયામેતત્ સતાં ચેષ્ટિતમ્ ॥ ૭૮॥

મનસિ વચસિ કાયે પુણ્યપીયૂષપૂર્ણાઃ
    ત્રિભુવનમુપકારશ્રેણિભિઃ પ્રીણયન્તઃ ।
પરગુણપરમાણૂન્ પર્વતીકૃત્ય નિત્યં
    નિજહૃદિ વિકસન્તઃ સન્તિ સન્તઃ કિયન્તઃ ॥ ૭૯॥

કિં તેન હેમગિરિણા રજતાદ્રિણા વા
    યત્રાશ્રિતાશ્ચ તરવસ્તરવન્ત એવ ।
મન્યામહે મલયમેવ યદાશ્રયેણ
    કઙ્કોલનિમ્બકુટજા અપિ ચન્દનાઃ સ્યુઃ ॥ ૮૦॥

રત્નૈર્મહાર્હૈસ્તુતુષુર્ન દેવા
	ન ભેજિરે ભીમવિષેણ ભીતિમ્ ।
સુધાં વિના ન પ્રયયુર્વિરામં
	ન નિશ્ચિતાર્થાદ્વિરમન્તિ ધીરાઃ ॥ ૮૧॥

ક્વચિત્ પૃથ્વીશય્યઃ ક્વચિદપિ ચ પર્યઙ્કશયનઃ
	ક્વચિચ્છાકાહારઃ ક્વચિદપિ ચ શાલ્યોદનરુચિઃ ।
ક્વચિત્ કણ્ઠાધારી ક્વચિદપિ ચ દિવ્યામ્બરધરો
	મનસ્વી કાર્યાર્થી ન ગણયતિ ચ દુઃખં ન ચ સુખમ્ ॥ ૮૨॥

ઐશ્વર્યસ્ય વિભૂષણં સુજનતા શૌર્યસ્ય વાક્સંયમો
	જ્ઞાનસ્યોપશમઃ શ્રુતસ્ય વિનયો વિત્તસ્ય પાત્રે વ્યયઃ ।
અક્રોધસ્તપસઃ ક્ષમા પ્રભવિતુર્ધર્મસ્ય નિર્વ્યાજતા
	સર્વેષામપિ સર્વકારણમિદં શીલં પરં ભૂષણમ્ ॥ ૮૩॥

નિન્દન્તુ નીતિનિપુણા યદિ વા સ્તુવન્તુ
	લક્ષ્મીઃ સમાવિશતુ ગચ્છતુ વ યથેષ્ટમ્ ।
અદ્યૈવ વા મરણમસ્તુ યુગાન્તરે વા
	ન્યાય્યાત્પથઃ પ્રવિચલન્તિ પદં ન ધીરાઃ ॥ ૮૪॥

પાતિતોઽપિ કરાઘાતૈરુત્પતત્યેવ કન્દુકઃ ।
પ્રાયેણ સાધુવૃત્તનામસ્થાયિન્યો વિપત્તયઃ ॥ ૮૫॥

આલસ્યં હિ મનુષ્યાણાં શરીરસ્થો મહારિપુઃ ।
નાસ્ત્યુદ્યમસમો બન્ધુઃ કુર્વાણો નાવસીદતિ ॥ ૮૬॥

છિન્નોઽપિ રોહતિ તરુશ્ચન્દ્રઃ ક્ષીણોઽપિ વર્ધતે લોકે ।
ઇતિ વિમૃશન્તઃ સન્તઃ સન્તપ્યન્તે ન લોકેઽસ્મિન્ ॥ ૮૭॥

નેતા યસ્ય બૃહસ્પતિઃ પ્રહરણં વજ્રં સુરાઃ સૈનિકાઃ
	સ્વર્ગો દુર્ગમનુગ્રહઃ ખલુ હરેરૈરાવતો વારણઃ ।
ઇત્યૈશ્વર્યબલાન્વિતોઽપિ બલભિદ્ભગ્નઃ પરૈઃ સઙ્ગરે
	તદ્વ્યક્તં નનુ દૈવમેવ શરણં ધિગ્ધિગ્વૃથા પૌરુષમ્ ॥ ૮૮॥

ભગ્નાશસ્ય કરણ્ડપિણ્ડિતતનોર્મ્લાનેન્દ્રિયસ્ય ક્ષુધા
	કૃત્વાખુર્વિવરં સ્વયં નિપતિતો નક્તં મુખે ભોગિનઃ ।

તૃપ્તસ્તત્પિશિતેન સત્વરમસૌ તેનૈવ યાતઃ પથા
લોકાઃ પશ્યત દૈવમેવ હિ નૃણાં વૃદ્ધૌ ક્ષયે કારણમ્ ॥ ૮૯॥

કર્માયત્તં ફલં પુંસાં બુદ્ધિઃ કર્માનુસારિણી ।
તથાપિ સુધિયા ભાવ્યં સુવિચાર્યૈવ કુર્વતા ॥ ૯૦॥

ખલ્વાટો દિવસેશ્વરસ્ય કિરણૈઃ સન્તાપિતો મસ્તકે
વાઞ્છન્દેશમનાતપં વિધિવશાત્તાલસ્ય મૂલં ગતઃ ।
તત્રોચ્ચૈર્મહતા ફલેન પતતા ભગ્નં સશબ્દં શિરઃ
પ્રાયો ગચ્છતિ યત્ર ભાગ્યરહિતસ્તત્રાપદાં ભાજનમ્ ॥ ૯૧॥

રવિનિશાકરયોર્ગ્રહપીડનં ગજભુજઙ્ગમયોરપિ બન્ધનમ્ ।
મતિમતાં ચ વિલોક્ય દરિદ્રતાં વિધિરહો બલવાનિતિ મે મતિઃ ॥ ૯૨॥

સૃજતિ તાવદશેષગુણાકરં પુરુષરત્નમલઙ્કરણં ભુવઃ ।
તદપિ તત્ક્ષણભઙ્ગિ કરોતિ ચેદહહ કષ્ટમપણ્ડિતતા વિધેઃ ॥ ૯૩॥

પત્રં નૈવ યદા કરીરવિટપે દોષો વસન્તસ્ય કિં
નોલૂકોઽપ્યવલોકતે યદિ દિવા સૂર્યસ્ય કિં દૂષણમ્ ।
ધારા નૈવ પતન્તિ ચાતકમુખે મેઘસ્ય કિં દૂષણં
યત્પૂર્વં વિધિના લલાટલિખિતં તન્માર્જિતું કઃ ક્ષમઃ ॥ ૯૪॥

નમસ્યામો દેવાન્નનુ હતવિધેસ્તેઽપિ વશગા
વિધિર્વન્દ્યઃ સોઽપિ પ્રતિનિયતકર્મૈકફલદઃ ।
ફલં કર્માયત્તં યદિ કિમમરૈઃ કિઞ્ચ વિધિના
નમસ્તત્કર્મભ્યો વિધિરપિ ન યેભ્યઃ પ્રભવતિ ॥ ૯૫॥

બ્રહ્મા યેન કુલાલવન્નિયમિતો બ્રહ્માણ્ડભાણ્ડોદરે
વિષ્ણુર્યેન દશાવતારગહને ક્ષિપ્તો મહાસઙ્કટે ।
રુદ્રો યેન કપાલપાણિપુટકે ભિક્ષાટનં કારિતઃ
સૂર્યો ભ્રામ્યતિ નિત્યમેવ ગગને તસ્મૈ નમઃ કર્મણે ॥ ૯૬॥

નૈવાકૃતિઃ ફલતિ નૈવ કુલં ન શીલં
વિદ્યાપિ નૈવ ન ચ યત્નકૃતાપિ સેવા ।
ભાગ્યાનિ પૂર્વતપસા ખલુ સઞ્ચિતાનિ
કાલે ફલન્તિ પુરુષસ્ય યથૈવ વૃક્ષાઃ ॥ ૯૭॥

વને રણે શત્રુજલાગ્નિમધ્યે

મહાર્ણવે પર્વતમસ્તકે વા ।
સુપ્તં પ્રમત્તં વિષમસ્થિતં વા
રક્ષન્તિ પુણ્યાનિ પુરા કૃતાનિ ॥ ૯૮॥

યા સાધૂંશ્ચ ખલાન્ કરોતિ વિદુષો મૂર્ખાન્ હિતાન્ દ્વેષિણઃ
પ્રત્યક્ષં કુરુતે પરોક્ષમમૃતં હાલાહલં તત્ક્ષણાત્ ।
તામારાધય સત્ક્રિયાં ભગવતીં ભોક્તું ફલં વાઞ્છિતં
હે સાધો વ્યસનૈર્ગુણેષુ વિપુલેષ્વાસ્થાં વૃથા મા કૃથાઃ ॥ ૯૯॥

ગુણવદગુણવદ્વા કુર્વતા કાર્યજાતં
પરિણતિરવધાર્યા યત્નતઃ પણ્ડિતેન ।
અતિરભસકૃતાનાં કર્મણામાવિપત્તે-
ર્ભવતિ હૃદયદાહી શલ્યતુલ્યો વિપાકઃ ॥ ૧૦૦॥

સ્થાલ્યાં વૈદૂર્યમય્યાં પચતિ તિલકણાંશ્ચાન્દનૈરિન્ધનૌઘૈઃ
સૌવર્ણૈર્લાઙ્ગલાગ્રૈર્વિલિખતિ વસુધામર્કમૂલસ્ય હેતોઃ ।
કૃત્વા કર્પૂરખણ્ડાન્ વૃતિમિહ કુરુતે કો દ્રવાણાં સમન્તાત્
પ્રાપ્યેમાં કર્મભૂમિં ન ચરતિ મનુજો યસ્તપો મન્દભાગ્યઃ ॥ ૧૦૧॥

મજ્જત્વમ્ભસિ યાતુ મેરુશિખરં શત્રૂન્ જયત્વાવહે
વાણિજ્યં કૃષિસેવને ચ સકલા વિદ્યાઃ કલાઃ શિક્ષતામ્ ।
આકાશં વિપુલં પ્રયાતુ ખગવત્કૃત્વા પ્રયત્નં પરં
નાભાવ્યં ભવતીહ કર્મવશતો ભાવ્યસ્ય નાશઃ કુતઃ ॥ ૧૦૨॥

ભીમં વનં ભવતિ તસ્ય પુરં પ્રધાનં
સર્વો જનઃ સ્વજનતામુપયાતિ તસ્ય ।
કૃત્સ્ના ચ ભૂર્ભવતિ સન્નિધિરત્નપૂર્ણા
યસ્યાસ્તિ પૂર્વસુકૃતં વિપુલં નરસ્ય ॥ ૧૦૩॥

કો લાભો ગુણિસઙ્ગમઃ કિમસુખં પ્રાજ્ઞેતરૈઃ સઙ્ગતિઃ
કા હાનિઃ સમયચ્યુતિર્નિપુણતા કા ધર્મતત્ત્વે રતિઃ ।
કઃ શૂરો વિજિતેન્દ્રિયઃ પ્રિયતમા કાનુવ્રતા કિં ધનં
વિદ્યા કિં સુખમપ્રવાસગમનં રાજ્યં કિમાજ્ઞાફલમ્ ॥ ૧૦૪॥

અપ્રિયવચનદરિદ્રૈઃ પ્રિયવચનાઢ્યૈઃ સ્વદારપરિતુષ્ટૈઃ ।
પરપરિવાદનિવૃત્તૈઃ ક્વચિત્ક્વચિન્મણ્ડિતા વસુધા ॥ ૧૦૫॥

કદર્થિતસ્યાપિ હિ ધૈર્યવૃત્તેર્ન શક્યતે ધૈર્યગુણઃ પ્રમાર્ષ્ટુમ્ ।
અધોમુખસ્યાપિ કૃતસ્ય વન્હેર્નાધઃ શિખા યાતિ કદાચિદેવ ॥ ૧૦૬॥

કાન્તાકટાક્ષવિશિખા ન લુનન્તિ યસ્ય
ચિત્તં ન નિર્દહતિ કોપકૃશાનિતાપઃ ।
કર્ષન્તિ ભૂરિવિષયાશ્ચ ન લોભપાશૈ-
ર્લોકત્રયં જયતિ કૃત્સ્નમિદં સ ધીરઃ ॥ ૧૦૭॥

એકેનાપિ હિ શૂરેણ પાદાક્રાન્તં મહીતલમ્ ।
ક્રિયતે ભાસ્કરેણેવ સ્ફારસ્ફુરિતતેજસા ॥ ૧૦૮॥

વહ્નિસ્તસ્ય જલાયતે જલનિધિઃ કુલ્યાયતે તત્ક્ષણાત્
મેરુઃ સ્વલ્પશિલાયતે મૃગપતિઃ સદ્યઃ કુરઙ્ગાયતે ।
વ્યાલો માલ્યગુણાયતે વિષરસઃ પીયૂષવર્ષાયતે
યસ્યાઙ્ગેઽખિલલોકવલ્લભતમં શીલં સમુન્મીલતિ ॥ ૧૦૯॥

લજ્જાગુણૌઘજનનીં જનનીમિવ સ્વાં
અત્યન્તશુદ્ધહૃદયામનુવર્તમાનામ્ ।
તેજસ્વિનઃ સુખમસૂનપિ સન્ત્યજન્તિ
સત્યવ્રતવ્યસનિનો ન પુનઃ પ્રતિજ્ઞામ્ ॥ ૧૧૦॥

There are different versions of nItishataka and the total verse numbers differ depending on the publication.
See Reference link 4 for example.

Encoded and proofread by Atul Narkhade
Reproofread by Kaushal Kaloo

*Nitishatak by Bhartrihari*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*